श्रीभगवानुवाच ।

śrībhagavānuvāca ।

बहूनि मे व्यतीतानि जन्मानि तव चार्जुन ।

तान्यहं वेद सर्वाणि न त्वं वेत्थ परंतप ॥ ४.५ ॥

bahūni me vyatītāni janmāni tava cārjuna ।
tānyahaṁ veda sarvāṇi na tvaṁ vettha parantapa ।। 4.5।।

अजोऽपि सन्नव्ययात्मा भूतानामीश्वरोऽपि सन् ।

प्रकृतिं स्वामधिष्ठाय संभवाम्यात्ममायया ॥ ४.६ ॥

ajo'pi sannavyayātmā bhūtānāmīśvaro'pi san ।
prakṛtiṁ svāmadhiṣṭhāya sambhavāmyātmamāyayā ।। 4.6।।

यदा यदा हि धर्मस्य ग्लानिर्भवति भारत ।

अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम् ॥ ४.७ ॥

yadā yadā hi dharmasya glānirbhavati bhārata ।
abhyutthānamadharmasya tadātmānaṁ sṛjāmyaham ।। 4.7।।

परित्राणाय साधूनां विनाशाय च दुष्कृताम् ।

धर्मसंस्थापनार्थाय संभवामि युगे युगे ॥ ४.८ ॥

paritrāṇāya sādhūnāṁ vināśāya ca duṣkṛtām ।
dharmasaṁsthāpanārthāya sambhavāmi yuge yuge ।। 4.8।।

जन्म कर्म च मे दिव्यमेवं यो वेत्ति तत्त्वतः ।

त्यक्त्वा देहं पुनर्जन्म नैति मामेति सोऽर्जुन ॥ ४.९ ॥

janma karma ca me divyamevaṁ yo vetti tattvataḥ ।
tyaktvā dehaṁ punarjanma naiti māmeti so'rjuna ।। 4.9।।